**SET-4**

**Series TYM/R**

कोड नं.
Code No. **52/R**

रोल नं.
Roll No. | | | | | | | |

परीक्षार्थी कोड को उत्तर-पुस्तिका के मुख-पृष्ठ पर अवश्य लिखें ।
Candidates must write the Code on the title page of the answer-book.

- कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **16** हैं ।
- प्रश्न-पत्र में दाहिने हाथ की ओर दिए गए कोड नम्बर को छात्र उत्तर-पुस्तिका के मुख-पृष्ठ पर लिखें ।
- कृपया जाँच कर लें कि इस प्रश्न-पत्र में **14** प्रश्न हैं ।
- **कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें ।**
- इस प्रश्न-पत्र को पढ़ने के लिए 15 मिनट का समय दिया गया है । प्रश्न-पत्र का वितरण पूर्वाह्न में 10.15 बजे किया जाएगा । 10.15 बजे से 10.30 बजे तक छात्र केवल प्रश्न-पत्र को पढ़ेंगे और इस अवधि के दौरान वे उत्तर-पुस्तिका पर कोई उत्तर नहीं लिखेंगे ।
- Please check that this question paper contains **16** printed pages.
- Code number given on the right hand side of the question paper should be written on the title page of the answer-book by the candidate.
- Please check that this question paper contains **14** questions.
- **Please write down the Serial Number of the question before attempting it.**
- 15 minute time has been allotted to read this question paper. The question paper will be distributed at 10.15 a.m. From 10.15 a.m. to 10.30 a.m., the students will read the question paper only and will not write any answer on

# संस्कृतम्

# SANSKRIT

*अवधिः : होरात्रयम्* | *पूर्णांकाः : 80*

*निर्धारित समय : 3 घण्टे* | *अधिकतम अंक : 80*

*Time allowed : 3 hours* | *Maximum Marks : 80*

| | | |
|---|---|---|
| खण्डः क : | अपठितांश-अवबोधनम् (अपठितांश-अवबोधन) | 10 अङ्काः |
| SECTION A : | Unseen Reading Comprehension | 10 Marks |
| खण्डः ख : | रचनात्मककार्यम् (रचनात्मक-कार्य) | 15 अङ्काः |
| SECTION B : | Writing Skills | 15 Marks |
| खण्डः ग : | अनुप्रयुक्तव्याकरणम् (अनुप्रयुक्त व्याकरण) | 25 अङ्काः |
| SECTION C : | Applied Grammar | 25 Marks |
| खण्डः घ : | पठित-अवबोधनम् (पठित-अवबोधन) | 30 अङ्काः |
| SECTION D : | Reading Comprehension | 30 Marks |

***निर्देशाः :***

***Instructions :***

*(i)* *अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति ।*
*इस प्रश्न-पत्र में चार खण्ड हैं ।*
*The question paper has four sections.*

*(ii)* *प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।*
*प्रत्येक खण्ड के उत्तर एक ही जगह पर क्रम से लिखने होंगे ।*
*The answers to each section must be written at one place.*

*(iii)* *प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया ।*
*प्रश्न-पत्र के अनुसार प्रश्न-संख्या अवश्य ही लिखनी होगी ।*
*Write the question number according to the question paper.*

*(iv)* *सर्वेषां प्रश्नानाम् उत्तराणि* ***संस्कृतेन*** *लेखनीयानि ।*
*सभी प्रश्नों के उत्तर* ***संस्कृत*** *में लिखिए ।*
*Answer all the questions in* ***Sanskrit****.*

## खण्डः क (SECTION A)

## अपठितांश-अवबोधनम् (अपठितांश-अवबोधन)

## Unseen Reading Comprehension

10 अङ्काः

**1.** अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नान् संस्कृतेन उत्तरत ।

निम्नलिखित अनुच्छेद को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में दीजिए ।

Read the following passage and answer the given questions in Sanskrit.

संस्कृतसाहित्यस्य द्विधा विभाजनं क्रियते – वैदिकं लौकिकं च । अत्र लौकिकसाहित्यभेदान्तर्गतं नीतिकथासाहित्यं परिगण्यते । नीतिकथासाहित्ये विष्णुशर्मविरचितं पञ्चतन्त्रम् अतिमहत्त्वपूर्णस्थानं सन्धारयति । कस्यचिद् राज्ञः राजनीतिकज्ञानशून्यान् शास्त्रविमुखांश्च पुत्रान् शिक्षयितुम् अस्य रचना कृता । अत्र जन्तुकथामाध्यमेन राज्ञां कृते अतिमहत्त्वपूर्णं व्यावहारिकं ज्ञानं प्रदत्तम् । एतत् न केवलं राज्ञाम् अपितु सामान्यजनानां कृतेऽपि अतीवोपयोगि । पञ्चमशताब्द्याम् एव पञ्चतन्त्रस्य कीर्तिः भारताद् बहिः विदेशेष्वपि प्रसृता ।

**प्रश्नाः**

I. एकपदेन उत्तरत ।

एक शब्द में उत्तर दीजिए ।

Answer in one word. $\frac{1}{2} \times 4 = 2$

(i) पञ्चतन्त्रस्य लेखकः कः ?

(ii) अत्र व्यावहारिकं ज्ञानं केन माध्यमेन प्रदत्तम् ?

(iii) 'प्रजानाम्' इत्यस्य किं विलोमपदमत्र प्रयुक्तम् ?

(iv) 'पशु' इत्यस्य किं समानार्थकं पदमत्र प्रयुक्तम् ?

II. पूर्णवाक्येन उत्तरत ।

पूर्ण वाक्य में उत्तर दीजिए ।

Answer in a complete sentence. $2 \times 2 = 4$

(i) कस्मिन् समये पञ्चतन्त्रस्य कीर्तिः विदेशेषु प्रसृता ?

(ii) पञ्चतन्त्रस्य रचना कुतः कृता ?

III. प्रदत्तविकल्पेभ्य: उचितम् उत्तरं चित्वा लिखत ।

दिए गए विकल्पों में से उचित उत्तर चुनकर लिखिए ।

Choose and write the appropriate answer from the given options. $\frac{1}{2} \times 4 = 2$

(क) कस्य द्विधा विभाजनं क्रियते ?

(i) भारतस्य

(ii) पञ्चतन्त्रस्य

(iii) राज्ञ:

(iv) संस्कृतसाहित्यस्य

(ख) कस्य कीर्ति: भारताद् बहि: प्रसृता ?

(i) भारतस्य

(ii) पञ्चतन्त्रस्य

(iii) सामान्यजनानाम्

(iv) राज्ञ:

(ग) 'यश:' इत्यस्य स्थाने किं पर्यायपदम् अत्र प्रयुक्तम् ?

(i) स्थानम्

(ii) रचना

(iii) कीर्ति:

(iv) अतीवोपयोगि

(घ) 'सन्धारयति' इति क्रियापदस्य कर्तृपदं किम् ?

(i) राज्ञाम्

(ii) पुत्रान्

(iii) पञ्चतन्त्रम्

(iv) अहम्

IV. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत ।

इस अनुच्छेद के लिए उपयुक्त शीर्षक संस्कृत में लिखिए ।

Write the appropriate title for this passage in Sanskrit. 2

## खण्डः ख (SECTION B)

## रचनात्मककार्यम् (रचनात्मक-कार्य)

**Writing Skills** 15 अङ्काः

**2.** मित्रं प्रति लिखितम् अध:पत्रं मञ्जूषाप्रदत्तशब्दैः पूरयित्वा पुन: लिखत ।

मित्र को लिखे गए निम्नलिखित पत्र को मञ्जूषा में दिए गए शब्दों की सहायता से पूर्ण कर पुन: लिखिए ।

Complete the following letter written to your friend with the help of the words given in the box and rewrite the same. $\frac{1}{2} \times 10=5$

अमृतसरनगरत:
दिनाङ्कः __________

प्रिय मित्र सुकेश !

सप्रेम (i) __________,

अत्र कुशलं तत्राप्यस्तु । आगामिमासे मम (ii) __________ परीक्षा सम्पन्नतां प्रयाति, तदनन्तरं च (iii) __________ भविष्यन्ति । एतेषु दिवसेषु प्रकाशपर्व (iv) __________ समापतति । तदा अस्य नगरस्य (v) __________ विशिष्टा मनोहारिणी च भवति । सुवर्णमन्दिरं हि (vi) __________ विद्युद्दीपपङ्क्तिभि: अलं क्रियते । पवित्रे सरोवरे तस्य प्रतिबिम्बम् अतीव (vii) __________ नयनाकर्षकं च भवति । एतदवसरे त्वया अत्र अवश्यं समागन्तव्यम् । अहं त्वां (viii) __________ दर्शनीयस्थानानि दर्शयिष्यामि । आशासे त्वम् (ix) __________ आगमिष्यसि । माता-पितृ-चरणेषु मे प्रणामाञ्जलयो निवेदनीया: ।

तव (x) __________
नचिकेता:

**मञ्जूषा**

| |
|---|
| अभिन्नहृदय:, नमो-नम:, सर्वाणि, अर्धवार्षिकी, अवश्यम्, अवकाशदिनानि, दीपावली, नानावर्णोपेताभि:, शोभते, मनोहारि । |

**3.** अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां साहाय्येन **पञ्च** वाक्यानि संस्कृतेन लिखत ।

नीचे दिए गए चित्र का वर्णन मञ्जूषा में दिए गए शब्दों की सहायता से **पाँच** संस्कृत वाक्यों में कीजिए ।

Describe the following picture in **five** Sanskrit sentences with the help of the words given in the box below. *2×5=10*



**मञ्जूषा**

| |
|---|
| नदी, स्त्रियः, घटम्, जलेन, प्रपूर्य, नौका, मन्दिरम्, वृक्षाः, पक्षी, शाखायाम्, कुक्कुरः, वार्तालापमग्नाः, सोपानपङ्क्तिः । |

**अथवा (OR)**

मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य **पञ्चभिः** संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत ।

मञ्जूषा में दिए गए शब्दों की सहायता से निम्नलिखित विषय पर **पाँच** संस्कृत वाक्यों में एक अनुच्छेद लिखिए ।

Write a paragraph in **five** Sanskrit sentences on the following topic with the help of the words given in the box. *2×5=10*

**"मम विद्यालयः"**

**मञ्जूषा**

| |
|---|
| विशालभवनम्, कक्षाः, पुस्तकालयः, क्रीडाङ्गणम्, प्राचार्यः, त्रिंशत्, घण्टानादः, अध्यापकाः, वृक्षाः, सहायतार्थं तत्पराः, चिकित्साकक्षः, प्रतिवर्षम्, संस्कृतदिवससमारोहः, प्रतियोगिताः । |

## खण्डः ग (SECTION C)

## अनुप्रयुक्तव्याकरणम् (अनुप्रयुक्त व्याकरण)

## Applied Grammar

*25* अङ्काः

**4.** अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कृत्वा लिखत ।

निम्नलिखित वाक्यों में रेखांकित पदों में सन्धि अथवा सन्धि-विच्छेद करके लिखिए ।

Write the underlined words of the following sentences after joining or disjoining Sandhis. *1×4=4*

(i) नौ + इकः लोकान् नदीपारं नयति ।

(ii) मयूरो वने नृत्यति ।

(iii) अष्टावक्रः तु द्वादशवर्षीयः एव आसीत् ।

(iv) अनिच्छन् + अपि वार्ष्णेय ।

**5.** अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत ।

निम्नलिखित वाक्यों में रेखांकित पदों का समास अथवा विग्रह दिए गए विकल्पों में से चुनकर लिखिए ।

Choose and write the correct compounded or expounded forms of the underlined words in the following sentences. *1×4=4*

(क) एकः मेषः जिह्वालोलुपतया महानसं प्रविशति स्म ।

(i) जिह्वा च लोलुपता च

(ii) जिह्वायाः लोलुपतया

(iii) जिह्वायां लोलुपता यस्य ।

(ख) नगरस्य समन्ततः धनधान्य-समृद्धाः दानशालाः ।

(i) धनं च धान्यं च

(ii) धने धान्यम्

(iii) धनधान्येन समृद्धता यस्मिन् ।

(ग) सः नेत्रं स्थानम् अनतिक्रम्य अस्थापयत् ।

(i) यथास्थानम्

(ii) स्थानातिक्रम्य

(iii) स्वास्थानम् ।

(घ) प्रच्छन्नभाग्यस्तु समुपजातः विवेकः यस्य स स्वगृहम् आगतः ।

(i) समुपजातविवेकौ

(ii) समुपजातविवेकवान्

(iii) समुपजातविवेकः ।

**6.** अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृतिप्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत ।

निम्नलिखित वाक्यों में रेखांकित पदों के प्रकृति-प्रत्ययों को जोड़कर या पृथक् करके उचित उत्तर विकल्पों में से चुनकर लिखिए ।

Write the underlined words of the following sentences after joining or disjoining suffixes to the roots or words, selecting the correct answer from the options given below. *1× 4=4*

(क) दानशालासु वि + चर् + शतृ राजा अचिन्तयत् ।

(i) विचरन्तम्

(ii) विचरन्

(iii) विचरत ।

(ख) अरुणाचलस्य <u>रमणीयता</u> मनोरमा अस्ति ।

(i) रमणीय + टाप्

(ii) रमणीय + तल्

(iii) रमणीय + ङीप् ।

(ग) <u>सेव् + शानच्</u> शिष्यं दृष्ट्वा गुरुः प्रसन्नः भवति ।

(i) सेवमानस्य

(ii) सेवन्तम्

(iii) सेवमानम् ।

(घ) पुरा मेवाड़राज्ये <u>शक्तिमान्</u> नृपः राणाप्रतापः आसीत् ।

(i) शक्ति + क्तवतु

(ii) शक्ति + मतुप्

(iii) शक्ति + शानच् ।

**7.** अधोलिखितं संवादं मञ्जूषायां प्रदत्तैः पदैः वाच्यपरिवर्तनं कृत्वा पूरयित्वा च पुनः लिखत ।

अधोलिखित संवाद को मञ्जूषा में दिए गए शब्दों की सहायता से वाच्य परिवर्तन करते हुए सम्पूर्ण संवाद पुनः लिखिए ।

Fill in the following dialogue by choosing the right words as per rules of voice. *1× 3=3*

*मोहनः* – किम् अशोकः लेखं लिखति ?

*सोहनः* – आम्, अशोकेन (i) __________ लिख्यते ।

*सुकेशः* – किं दिनेशः जनकं प्रणमति ?

*नचिकेताः* – आम् (ii) __________ जनकः प्रणम्यते ।

*शिक्षकः* – किं महिला जलम् (iii) __________ ?

*छात्रः* – आम् महिलया जलम् आनीयते ।

**मञ्जूषा**

| |
|---|
| आनयति, लेखः, दिनेशेन । |

**8.** अधोलिखितदिनचर्यायां रिक्तस्थानानि कालबोधकशब्दैः पूर्यन्ताम् ।

अधोलिखित दिनचर्या में रिक्त स्थानों की पूर्ति कालबोधक शब्दों से कीजिए ।

Rewrite the routine using Sanskrit words in place of figures. $\frac{1}{2} \times 4 = 2$

(i) अहं शीतकाले प्रातः 6.00 उत्तिष्ठामि ।

(ii) सा 8.00 ___ विद्यालयं गच्छति ।

(iii) तव जनकः सायं 5.30 गृहम् आगच्छति ।

(iv) मम भगिनी 4.00 सखीगृहं गच्छति ।

**9.** अधोलिखितवाक्येषु रिक्तस्थानानि मञ्जूषाप्रदत्तैः उचितैः अव्ययपदैः पूरयित्वा लिखत ।

निम्नलिखित वाक्यों में रिक्त स्थानों की पूर्ति मञ्जूषा में दिए गए अव्यय पदों के द्वारा कीजिए ।

Fill in the blanks in the following sentences with appropriate indeclinable words given in the box. $1 \times 4 = 4$

(i) कोलाहलं __________ कुरु ।

(ii) __________ कार्यम् अद्य करणीयम् ।

(iii) __________ कार्यं न विदधीत ।

(iv) त्वं हरिद्वारं __________ गमिष्यसि ?

**मञ्जूषा**

| कदा, मा, श्वः, सहसा । |
|---|

**10.** अधोलिखितवाक्येषु रेखाङ्कितपदम् अशुद्धम् अस्ति । अशुद्धं पदं संशोध्य पुनः लिखत ।

निम्नलिखित वाक्यों में रेखांकित पद अशुद्ध है । अशुद्ध पद को संशोधित कर पुनः लिखिए ।

Correct the underlined incorrect words in the following sentences. $1 \times 4 = 4$

(i) युवां विद्यालयं <u>गच्छतः</u> ।

(ii) त्वं <u>सर्वे</u> फलानि गृहीत्वा आगच्छ ।

(iii) रमा अध्ययने <u>रतः</u> अस्ति ।

(iv) ह्यः चन्द्रकुमारः विद्यालयं <u>गमिष्यति</u> ।

## खण्डः घ (SECTION D)

## पठित-अवबोधनम् (पठित-अवबोधन)

### Reading Comprehension

*30 अङ्काः*

**11.** अधोलिखितं गद्यांशं, पद्यं, नाट्यांशं च पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत ।
निम्नलिखित गद्यांश, पद्य तथा नाट्यांश को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में लिखिए ।
Read the following prose, poetry and drama passages and answer the given questions in Sanskrit.

(अ) **गद्यांशः**

अथ व्रजन्तौ तौ गर्तसंकुले मार्गे क्रीडत: कांश्चित् बालकान् प्रेक्ष्य अवदताम् – भो भो बालका: ! कथमत्र नतोन्नते विषमे मार्गे क्रीडथ ? यदि कश्चिद् गर्ते पतेत् तर्हि स विकलाङ्गो भूत्वा चिरं क्लेशम् अनुभवेत् । तच्छ्रुत्वा तच्छ्रुत्वा तेषु कश्चिद् उद्दण्ड: बालक: उवाच – अपि भो ! यद्येवं तर्हि कथं भवन्तौ सुपथं परित्यज्य अनेन कुपथेन गन्तुं प्रवृत्तौ ? अपि इदं श्रेयस्करम् ?

**प्रश्ना:**

I. एकपदेन उत्तरत ।
एक शब्द में उत्तर दीजिए ।
Answer in one word. *1×2=2*

(i) कुत्र क्रीडत: बालकान् प्रेक्ष्य तौ अवदताम् ?
(ii) नतोन्नत: विषम: क: आसीत् ?

II. पूर्णवाक्येन उत्तरत ।
पूर्ण वाक्य में उत्तर दीजिए ।
Answer in a complete sentence. *2×1=2*
यदि कश्चिद् गर्ते पतेत् तदा किं भविष्यति ?

III. प्रदत्तविकल्पेभ्य: उचितम् उत्तरं चित्वा लिखत ।
दिए गए विकल्पों में से उचित उत्तर चुनकर लिखिए ।
Choose and write the appropriate answer from the given options. $\frac{1}{2}\times 4=2$

(क) 'अवदताम्' इति क्रियापदस्य कर्तृपदं किम् ?
(i) भवन्तौ
(ii) बालक:
(iii) तौ ।

(ख) 'आदाय' इत्यस्य किं विलोमपदम् अत्र प्रयुक्तम् ?

(i) गन्तुम्

(ii) परित्यज्य

(iii) क्लेशम् ।

(ग) 'विषमे मार्गे' अनयो: विशेषणपदं किम् ?

(i) मार्गे

(ii) नतोन्नते

(iii) विषमे ।

(घ) 'तेषु' इति सर्वनामपदं केभ्य: प्रयुक्तम् ?

(i) बालकेभ्य:

(ii) मार्गेभ्य:

(iii) गर्तेभ्य: ।

(ब) <u>पद्यम्</u>

**"पिता यच्छति पुत्राय बाल्ये विद्याधनं महत् ।**
**पिताऽस्य किं तपस्तेपे इत्युक्तिस्तत्कृतज्ञता ।।"**

**प्रश्नाः**

I. एकपदेन उत्तरत ।
एक शब्द में उत्तर दीजिए ।
Answer in one word. *1×2=2*

(i) पिता पुत्राय कदा विद्याधनं यच्छति ?

(ii) पिता किं तेपे ?

II. पूर्णवाक्येन उत्तरत ।
पूर्ण वाक्य में उत्तर दीजिए ।
Answer in a complete sentence. *2×1=2*

किं धनं महत् अस्ति ?

III. प्रदत्तविकल्पेभ्य: उचितम् उत्तरं चित्वा लिखत ।

दिए गए विकल्पों में से उचित उत्तर चुनकर लिखिए ।

Choose and write the appropriate answer from the given options. $\frac{1}{2} \times 4=2$

(क) श्लोके 'अस्य' इति सर्वनामपदं कस्मै प्रयुक्तम् ?

(i) बाल्याय

(ii) पुत्राय

(iii) तपसे ।

(ख) 'महत्' इति पदं कस्य विशेषणम् ?

(i) पितु:

(ii) पुत्रस्य

(iii) विद्याधनस्य ।

(ग) 'यच्छति' इति क्रियापदस्य कर्तृपदं किम् ?

(i) पुत्र:

(ii) बाल्यम्

(iii) पिता ।

(घ) 'गृह्णाति' इति क्रियापदस्य किं विलोमपदमत्र प्रयुक्तम् ?

(i) तेपे

(ii) यच्छति

(iii) विद्याधनम् ।

(स) **नाट्यांश:**

*श्रीकृष्ण:* – भो धर्मराज ! समीचीनं न कृतं भवता । पुत्रशोकविह्वल: भीमसेन: एकाकी एव द्रौणिं हन्तुम् अभिधावति ।

*युधिष्ठिर:* – भगवन् ! स तु एकाकी एव द्रोणपुत्राय अलम् ।

*श्रीकृष्ण:* – वत्स ! न जानाति भवान् द्रौणे: चपलां प्रकृतिम् । पितु: द्रोणात् प्राप्तं ब्रह्मशिरो नाम अस्त्रं विद्यते अस्य पार्श्वे । यदि तत् प्रयुज्यते, सर्वा पृथ्वी दग्धा स्यात् ।

**प्रश्ना:**

I. एकपदेन उत्तरत ।
एक शब्द में उत्तर दीजिए ।
Answer in one word. *1×2=2*

(i) क: एकाकी एव द्रोणपुत्राय अलम् ?
(ii) युधिष्ठिर: कस्य चपलां प्रकृतिं न जानाति ?

II. पूर्णवाक्येन उत्तरत ।
पूर्ण वाक्य में उत्तर दीजिए ।
Answer in a complete sentence. *2×1=2*

द्रोणपुत्रेण पितु: किं प्राप्तम् ?

III. प्रदत्तविकल्पेभ्य: उचितम् उत्तरं चित्वा लिखत ।
दिए गए विकल्पों में से उचित उत्तर चुनकर लिखिए ।
Choose and write the appropriate answer from the given options. $\frac{1}{2}\times 4=2$

(क) 'प्रकृतिम्' इत्यस्य विशेषणं किम् ?
(i) सर्वा
(ii) पृथ्वी
(iii) चपलाम् ।

(ख) 'अभिधावति' इति क्रियापदस्य कर्तृपदं किम् ?
(i) श्रीकृष्ण:
(ii) युधिष्ठिर:
(iii) भीमसेन: ।

(ग) 'धर्मराज !' इति सम्बोधनपदं कस्मै प्रयुक्तम् ?
(i) श्रीकृष्णाय
(ii) युधिष्ठिराय
(iii) भीमसेनाय ।

(घ) 'स्वभावम्' इत्यस्य किं समानार्थकं पदम् अत्र प्रयुक्तम् ?
(i) समीचीनम्
(ii) प्रकृतिम्
(iii) हन्तुम् ।

**12.** रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत ।

रेखांकित पदों के आधार पर प्रश्न-निर्माण कीजिए ।

Frame the questions on the basis of the underlined words. *1×4=4*

(i) तस्मिन् राजगृहे बालवाहनयोग्यं <u>मेषयूथम्</u> आसीत् ।

(ii) <u>अमात्या:</u> विषण्णा: भूत्वा अवदन् ।

(iii) जलबिन्दुनिपातेन क्रमश: पूर्यते <u>घट:</u> ।

(iv) ध्यायतो <u>विषयान्</u> पुंस: संगस्तेषूपजायते ।

**13.** मञ्जूषात: समुचितपदानि चित्वा अधोलिखितश्लोक**द्वय**स्य अन्वयं पूरयत ।
मञ्जूषा में से समुचित पद चुनकर निम्नलिखित **दोनों** श्लोकों के अन्वय को पूर्ण कीजिए ।
Complete the prose order of the following **two** shlokas by choosing the appropriate words given in the box.

(क) **"क्रन्दनं वर्धते तस्य नान्तं समधिगच्छति ।**
**व्यसनं प्राप्य यो मोहात् केवलं परिदेवयेत् ।।"** $\frac{1}{2}\times 4=2$

<u>**अन्वय:**</u>

य: (i) ________ प्राप्य मोहात् केवलं (ii) ________ तस्य क्रन्दनं (iii) ________ (iv) ________ (च) न समधिगच्छति ।

(ख) **"कपीनां मेदसा दोषो वह्निदाहसमुद्भव: ।**
**अश्वानां नाशमभ्येति तम: सूर्योदये यथा ।।"** $\frac{1}{2}\times 4=2$

<u>**अन्वय:**</u>

अश्वानाम् (i) ________ दोष: (ii) ________ मेदसा (iii) ________ अभ्येति यथा सूर्योदये (iv) ________ ।

**मञ्जूषा**

| |
|---|
| वह्निदाहसमुद्भव:, व्यसनम्, नाशम्, अन्तम्, परिदेवयेत्, वर्धते, कपीनाम्, तम: । |

**14.** अधोलिखितकथनानां समुचितं भावं विकल्पेभ्य: चित्वा लिखत ।

निम्नलिखित कथनों का समुचित भाव विकल्पों में से चुनकर लिखिए ।

Choose and write the correct gist of the following sentences from the given options. *1×4=4*

(क) सहस्रांशु: न भासते ।

(i) सहस्ररूप्यकाणि

(ii) संविग्नम्

(iii) सूर्य: ।

(ख) अस्माभि: 'मिथुन' इति विषये अपि श्रुतम् ।

(i) युगलम्

(ii) राजपशु:

(iii) राशि: ।

(ग) मम केकारवं श्रुत्वा कोकिल: अपि लज्जते ।

(i) कृत्स्ना

(ii) मयूरध्वनिम्

(iii) कार्पण्यम् ।

(घ) समा: द्वादश पर्जन्यस्तद् राष्ट्रं नाभिवर्धते ।

(i) सम्प्रति

(ii) संमोह:

(iii) वर्षाणि ।